रचणं यस्मात् । यद्वा, चित्रं विचित्रं गुप्तं धर्म्मस्य रचणं यस्य । ) चतुर्द्दश्यमान्तर्गतयमः । तस्य लेखकः । इति मेदिनी । ते, १६८ ॥ तस्योत्पत्तिर्यथा,—

"ब्रह्मपादाद्गतः शूद्रस्तस्यौ द्वौ बभूवतुः ।
एको मसीग्रः सर्व्वाख्यः सर्व्वाणीहृदयद्विजात् ॥
कुलप्रदीपः खीयानां ज्ञातीनां पूततासृहः ।
वगलेति महाविद्यां गृहीत्वा साधयन् मुदा ॥
सर्व्वाणीहृदयाख्यस्य पण्डितस्य प्रसादतः ।
वरं याचितवान् भक्त्या त्रिलोकाधिपतिं, गुरो ।॥
कृपया कुरु मां नाथ । त्वमेव वगला मम ।
गुरुणापि वरो दत्तो राज्यं भुक्त्वा पुनर्भवान् ॥
त्रिलोकाधिपतिर्भूत्वा मुदा तत्र सुखिष्यति ।
गुर्व्वाज्ञया मसीग्रः स राज्यभोगी द्विजार्च्चनात्॥
विहाय देहं भूयश्च त्रिधारूपो बभूव ह ।
चित्रगुप्तश्चित्रसेनश्चित्राङ्गद इति त्रयः ॥
स्वर्गे मर्त्ते च पाताले राजते चिरसत्तमः ।
चित्रगुप्तो महाविद्यां प्राप्य कुल्लाख्यविप्रतः ॥
पुत्रान् याचितवान्नैव गुरोर्देवलमावहन् ।
यमान्तिस्थो बभूवापि सर्म्मर्त्ताधीविवेचकः ॥
चिरं शुभाशुभं कर्म्म विविच्य ग्रमनान्तिके ।
यद्वदेत् सकलानान्तु तदेवाभोजयेद्यमः ॥"

इत्याचारनिर्णयतन्त्रम् ॥

अस्योत्पत्त्यन्तरं कायस्थशब्दे द्रष्टव्यम् ॥

चित्रजल्पः, पुं, ( चित्रो मनोहरो जल्पः ।) वाक्यविशेषः । तल्लक्षणादिर्यथा,—

"प्रेष्ठस्य सुहृदा लोके गूढ़रोषाभिजृम्भितः ।
भूरिभावमयो जल्पो यस्तीव्रोत्कण्ठितान्तिमः ॥
चित्रजल्पो दशाङ्गोऽयं प्रजल्पः परिजल्पितम् ।
विजल्पो जल्पसंजल्पाववजल्पोऽभिजल्पितम् ॥
आजल्पः प्रतिजल्पश्च सुजल्पश्चेति कीर्त्तितः ।
एष भ्रमरगीताख्यो दशमे प्रकटीकृतः ॥
असकृद्भाववैचित्री चमत्कृतिसुदुस्तरः ।
अपि चेच्चित्रजल्पोऽयं मनाक् तदपि कथ्यते ॥
तत्र प्रजल्पः ।
असूयेर्ष्यामदयुजा योऽवधीरणमुद्रया ।
प्रियस्याकौशलोद्गारः प्रजल्पः स तु कीर्त्यते ॥
यथा,—
मधुप ! कितवबन्धो ! मा स्पृशाङ्घ्रिं सपत्न्याः
कुचविलुलितमालाकुङ्कुमश्मश्रुभिर्नः ।
वहतु मधुपतिस्तन्मानिनीनां प्रसादं
यदुसदसि विडम्ब्यं यस्य दूतस्त्वमीदृक् ॥ १ ॥
अथ परिजल्पितम् ।
प्रभोर्निर्द्दयताशाठ्यचापलाद्युपपादनात् ।
स्वविचक्षणताव्यक्तिर्भङ्ग्या स्यात् परिजल्पितम्॥
यथा,—
सकृदधरसुधां स्वां मोहिनीं पाययित्वा
सुमनस इव सद्यस्तत्यजेऽस्मान् भवादृक् ।
परिचरति कथं तत्पादपद्मं नु पद्मा
अपि बत हृतचेता उत्तमश्लोकजल्पैः ॥ २ ॥
अथ विजल्पः ।
व्यक्तयासूयया गूढ़मानमुद्रान्तरालया ।
अघद्विषि कटाक्षोक्तिर्विजल्पो विदुषां मतः ॥
यथा,—
किमिह बहु षडङ्घ्रे ! गायसि त्वं यदूनामधिपतिमगृहाणामग्रतो नः पुराणम् ।
विजयसखसखीनां गीयतां तत्प्रसङ्गः
क्षपितकुचरुजस्ते कल्पयन्तीष्टमिष्टाः ॥ ३ ॥
अथोज्जल्पः ।
हरेः कुहकताख्यानं गर्व्वगर्भितयेर्ष्यया ।
सासूयश्च तदाक्षेपो धीरैरुज्जल्प ईर्य्यते ॥
यथा,—
दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः
कपटरुचिरहासभ्रूविजृम्भस्य याः स्युः ।
चरणरज उपास्ते यस्य भूतिर्वयं का
अपि च कृपणपक्षे ह्युत्तमश्लोकशब्दः ॥ ४ ॥
अथ संजल्पः ।
सोल्लुण्ठया गहनया कयाप्याक्षेपमुद्रया ।
तस्याकृतज्ञताद्युक्तिः संजल्पः कथितो बुधैः ॥
यथा,—
विसृज शिरसि पादं वेद्म्यहं चाटुकारैरनुनयविदुषस्तेऽभ्येत्य दौत्यैर्मुकुन्दात् ।
स्वकृत इह विसृष्टापत्यपत्यन्यलोका
व्यसृजदकृतचेताः किन्नु सन्धेयमस्मिन् ॥ ५ ॥
अथ अवजल्पः ।
हरौ काठिन्यकामित्वधौर्त्त्यादासक्त्ययोग्यता ।
यत्र सेर्ष्यं भियेवोक्ता सोऽवजल्पः सतां मतः ॥
यथा,—
मृगयुरिव कपीन्द्रं विव्यधे लुब्धधर्म्मा
स्त्रियमकृत विरूपां स्त्रीजितः कामयानाम् ।
बलिमपि बलिमत्त्वाऽवेष्टयद्ध्वाङ्क्षवद्यस्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः ॥ ६ ॥
अथाभिजल्पितम् ।
भङ्ग्या त्यागौचितं तस्य खगानामपि खेदनात् ।
यत्र सानुशयं प्रोक्तं तद्भवेदभिजल्पितम् ॥
यथा,—
यदनुचरितलीलाकर्णपीयूषविप्रुट्सकृददनविधूतद्वन्द्वधर्म्मा विनष्टाः ।
सपदि गृहकुटुम्बं दीनमुत्सृज्य दीना
बहव इव विहङ्गा भिक्षुचर्य्यां चरन्ति ॥ ७ ॥
अथ आजल्पः ।
जैह्म्यं तस्यार्त्तिदत्वञ्च निर्व्वेदाद्यत्र कीर्त्तितम् ।
भङ्ग्यान्यसुखदत्वञ्च स आजल्प उदीरितः ॥
यथा,—
वयमृतमिव जिह्मव्याहृतं श्रद्दधानाः
कुलिकरुतमिवाज्ञाः कृष्णवध्वो हरिण्यः ।
ददृशुरसकृदेतत्तन्नखस्पर्शतीव्रस्मररुज उपमन्त्रिन् ! भण्यतामन्यवार्त्ता ॥ ८ ॥
अथ प्रतिजल्पः ।
दुस्त्यजद्वन्द्वभावेऽस्मिन् प्राप्तिर्नार्हेत्युद्धृतम् ।
दूतसंमाननेनोक्तं यत्र स प्रतिजल्पकः ॥
यथा,—
"प्रियसख ! पुनरागाः प्रेयसा प्रेषितः किं
वरय किमनुरुन्धे माननीयोऽसि मेऽङ्ग ! ।
नयसि कथमिहास्मान् दुस्त्यजद्वन्द्वपार्श्वं
सततमुरसि सौम्य ! श्रीर्वधूः साकमास्ते ॥ ९ ॥
अथ सुजल्पः ।
यत्रार्ज्जवात् सगाम्भीर्य्यं सदैन्यं सहचापलम् ।
सोत्कण्ठञ्च हरिः पृष्टः स सुजल्पो निगद्यते ॥
यथा,—
अपि बत ! मधुपुर्य्यामार्य्यपुत्त्रोऽधुनास्ते
स्मरति स पितृगेहान् ! सौम्यबन्धूंश्च गोपान् ।
क्वचिदपि स कथा नः किङ्करीणां गृणीते
भुजमगुरुसुगन्धं मूर्द्ध्न्यधास्यत् कदा नु ॥"१०॥

इत्युज्ज्वलनीलमणौ स्थायिभावः ॥

चित्रतण्डुलं, क्ली, (चित्रो विचित्रस्तण्डुलो यस्य ।) विड़ङ्गम् । इति रत्नमाला ॥

चित्रतण्डुला, स्त्री, ( चित्रो नानावर्णस्तण्डुलो यस्याः ।) विड़ङ्गम् । इत्यमरः । २ । ४ । १०६ ॥ (यथास्याः पर्य्यायाः ।

"पुंसि क्लीवे विड़ङ्गः स्यात् कृमिघ्नो जन्तुनाशनः।
तण्डुलश्च तथा वेल्लममोघा चित्रतण्डुला ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

चित्रत्वक्, [ च् ] पुं, ( चित्रा विचित्रा त्वक् यस्य । ) भूर्जवृक्षः । इति राजनिर्घण्टः ॥

चित्रदण्डकः, पु, ( चित्रो विचित्रो दण्डो यस्य । इति कप् । ) ओलवृक्षः । इति रत्नमाला ॥

चित्रदेवी, स्त्री, (चित्रं दीव्यतीति । दिव् + अच् । गौरादित्वात् ङीष् । ) महेन्द्रवारुणी । इति राजनिर्घण्टः ॥

चित्रनेत्रा, स्त्री, ( चित्रे मनोज्ञे नेत्रे यस्याः । ) सारिकापक्षी । इति हारावली । ५६ ॥

चित्रपक्षः, पुं, ( चित्रौ विचित्रौ पक्षौ यस्य । ) तित्तिरिपक्षी । इति जटाधरः ॥

चित्रपत्रिका, स्त्री, (चित्राणि विचित्राणि पत्राणि पर्णानि यस्याः । कापि अत इत्वम् ।) कपित्थपर्ण्यौषधः । इति रत्नमाला ॥ द्रोणपुष्पी । इति राजनिर्घण्टः ॥

चित्रपत्री, स्त्री, ( चित्राणि पत्राणि यस्याः । गौरादित्वात् ङीष् । ) जलपिप्पली । इति राजनिर्घण्टः ॥

चित्रपदा, स्त्री, ( चित्रं पदं यस्याः । ) गोधापदीलता । इति शब्दमाला ॥ छन्दोभेदः । इति छन्दोमञ्जरी ॥ अस्य लक्षणादि छन्दःशब्दे द्रष्टव्यम् ॥ (चित्रं पदं वस्तुविन्यासो यस्य यत्र वा इति विग्रहे विचित्रपदयुक्ते त्रि । यथा, महाभारते । ३ । ३१ । १ ।

"वल्गु चित्रपदं श्लक्ष्णं याज्ञसेनि ! त्वया वचः ।
उक्तं तत् श्रुतमस्माभिर्नास्तिक्यन्तु प्रभाससे ॥")

चित्रपर्णिका, स्त्री, (चित्राणि पर्णानि पत्राणि यस्याः । कापि अत इत्वम् । ) चित्रपर्णीभेदः । तत्पर्य्यायः । दीर्घा २ शृगालविन्ना ३ त्रिपर्णी ४ सिंहपुच्छिका ५ दीर्घपत्रा ६ अतिगुहा ७ पृष्ठिला ८ । इति रत्नमाला ॥

चित्रपर्णी, स्त्री, ( चित्राणि पर्णानि यस्याः । गौरादित्वात् ङीष । ) पृश्निपर्णी । इत्यमरः ।